योगवासिष्ठः/प्रकरणम् ४ (स्थितिप्रकरणम्)/सर्गः १२

द्वादशः सर्गः १२

काल उवाच ।

सुरासुरनराकारा इमा याः संविदो मुने ।

ब्रह्मार्णवादभिन्नास्ताः सत्यमेतन्मृषेतरत् ।। १

मिथ्याभावनया ब्रह्मन्स्वविकल्पकलङ्किताः ।

न ब्रह्म वयमित्यन्तर्निश्चयेन ह्यधोगताः ।। २

ब्रह्मणो व्यतिरिक्तत्वं ब्रह्मार्णवगता अपि ।

भावयन्त्यो विमुह्यन्ति भीमासु भवभूमिषु ।। ३

या एताः संविदो ब्राह्म्यो मननैककलङ्किताः ।

एतत्तत्कर्मणां बीजमप्यकर्मैव विद्धि ताः ।। ४

संकल्परूपयैवान्तर्मुने कलनयैतया ।

कर्मजालकरञ्जानां बीजमुष्ट्या करालया ।। ५

इमा जगति विस्तीर्णाः शरीरोपलपङ्क्तयः ।

तिष्ठन्ति परिवल्गन्ति रुदन्ति च हसन्ति च ।। ६

आब्रह्मस्तम्बपर्यन्तं स्पन्दनैः पवनो यथा ।

उल्लसन्ति निलीयन्ते म्लायन्ति विहसन्ति च ।। ७

ता एताः काश्चिदत्यच्छा यथा हरिहरादयः ।

काश्चिदल्पविमोहस्था यथोरगनरामराः ।। ८

काश्चिदत्यन्तमोहस्था यथा तरुतृणादयः ।

काश्चिदज्ञानसंमूढाः कृमिकीटत्वमागताः ।। ९

काश्चिचत्तृणवदुह्यन्ते दूरे ब्रह्ममहोदधेः ।

अप्राप्तभूमिका एता यथोरगनगादयः ।। १०

सत्त्वमात्रं समालोक्य काश्चिदेवमुपागताः ।
जाताजाता निखन्यन्ते कृतान्तजरठाखुना ।। ११

काश्चिदन्तरमासाद्य ब्रह्मतत्त्वमहाम्बुधेः ।
गतास्तत्तां समं कार्यैर्हरिब्रह्महरादिकाः ।। १२
अल्पमोहात्मिकाः काश्चित्तमेव ब्रह्मवारिधिम् ।
अदृष्टपारभूम्यौघमवलम्ब्य व्यवस्थिताः ।। १३
काश्चिद्बोक्तव्यजन्मौघभुक्तजन्मौघकोटयः ।
वन्ध्याः प्रकाशतामस्यः संस्थिता भूतजातयः ।। १४
काश्चिदूर्ध्वादधो यान्ति यथा हस्तान्महत्फलम् ।
ऊध्वादूर्ध्वतरं काश्चिदधस्तात्काश्चिदप्यधः ।। १५
बहुसुखदुःखकराकराक्षयेयं
परमपदास्मरणात्समागतेह ।
परमपदावगमात्प्रयाति नाशं
विहगपतिस्मरणाद्विषव्यथेव ।। १६

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० मो० स्थितिप्रकरणे भार्गवोपाख्याने संसारोत्पत्तिविस्तारवर्णनं नाम द्वादशः सर्गः ।। १२ ।।